# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| **कक्षा- आचार्य-१ (SEM-1)** | **प्रश्नपत्र-४** | **गुणाः - ७०** |
| **विषयः- साहित्यम् ( नाट्यवर्गः )** | **CC-413(4)** | **समयः - ०३ तः ०६** |
| **दिनाङ्कः - ०८/१२/२०१६** | **सन्दर्भग्रन्थः - नाट्यशास्त्रम् ( १-२ अध्यायौ )** | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ अधोनिर्दिष्टाभ्यामेकस्याः कारिकायाः ससन्दर्भं व्याख्यां कुर्वन्तु । ०४**

१. न वेद व्यवहारोऽयं संश्राव्यः शुद्रजातिषु ।
तस्मात् सृजापरं वेदं पञ्चमं सार्ववर्णिकम् ॥

२. ग्रहणे धारणे ज्ञाने प्रयोगे चास्य सत्तम ।
अशक्ता भगवन् देवा अयोग्या नाट्यकर्मणि ॥

**प्र-२ साहित्यशास्त्रे भरतमुनेः किं स्थानमिति विविच्य नाट्यशास्त्रकारस्य जीवनवृत्तान्तं लिख्यताम् । १२**

**अथवा**

**ब्रह्मणा नाट्यवेदस्य निर्माणं कथं कृतम्? इति सविस्तरं लिखत ।**

**प्र-३ निम्नलिखितेषु द्वौ समाधेयौ । ०४**

१. नान्दी ।

२. कैशिकीवृत्तेः का आवश्यकता?

३. भरतमुनेः पुत्राः ।

**॥ द्वितीयान्वितिः ॥**

**प्र-४ अधोनिर्दिष्टाभ्यामेकां कारिकां ससन्दर्भं व्याख्यायन्तु । ०४**

१. रङ्गपीठस्य मध्ये तु स्वयं ब्रह्मा प्रतिष्ठितः ।
इत्यर्थं रङ्गमध्ये तु क्रियते पुष्पमोक्षणम् ॥

२. धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम् ।
लोकोपदेशजननं नाट्यमेतद्भविष्यति ॥

**प्र-५ टिप्पणीद्वयं लिखत । ०८**

१. जर्जरः ।

२. नाट्यगृहस्य रक्षकदेवताः ।

३. ब्रह्मा विघ्नकर्तृभ्यः किमुपदिदेशः?

४. नाट्यस्वरूपम् ।

**प्र-६ त्रयाणां प्रश्नानाम् लघूत्तराणि लिखत । ०३**

१. आचार्यभरतस्य कति पुत्राः आसन्?

२. नाट्यमण्डपस्य रक्षार्थे विशेषरूपेण कस्य नियुक्तिः कृताऽस्ति?

३. कः देवः नायकं रक्षति?

४. नेपथ्यभूमेः रक्षार्थे कस्य नियुक्तिः कृता?

५. इन्द्रः कान् जर्जरीकरोति?

## ॥ तृतीयान्वितिः ॥

**प्र-७ एकां कारिकां ससन्दर्भं व्याख्यायत ।** **०४**

१. प्रेक्षागृहाणां सर्वेषां प्रशस्तं मध्यमं स्मृतम् ।
तत्र पाठ्यं च गेयं च सुखश्राव्यन्तरं भवेत् ॥

२. देवानां मानसी सृष्टिर्गृहेषूपवनेषु च ।
यत्नभावाभिनिष्पन्नाः सर्वे भावा हि मानुषाः ॥

**प्र-८ सूत्रप्रसारणविधिं समीक्षन्ताम् ।** **१२**

**अथवा**

**प्रेक्षागृहाणां भेदान् विलिख्य तेषां प्रमाणानि लक्षणानि च निरूपयत ।**

**प्र-९ द्वयोः उत्तरं लिखत ।** **०४**

१. नाट्यकर्मणि कानि नक्षत्राणि उत्तमानि?

२. नाट्यकर्मणि भूमियोजना ।

३. आधारशीलास्थापनक्रिया ।

## ॥ चतुर्थान्वितिः ॥

**प्र-१० एकस्याः कारिकायां ससन्दर्भं व्याख्यां कुरुत ।** **०४**

१. रङ्गपीठं ततः कार्यं विधिदृष्टेन कर्मणा ।
रङ्गशीर्षन्तु कर्तव्यं षड्दारुकसमन्वितम् ॥

२. त्र्यश्रं त्रिकोणं कर्तव्यं नाट्यवेश्म प्रयोक्तृभिः ।
मध्ये त्रिकोणमवास्य रङ्गपीठं तु कारयेत् ॥

**प्र-११ टिप्पणीद्वयं लिखत ।** **०८**

१. मत्तवारणी ।

२. चतुरस्रप्रेक्षागृहम् ।

३. स्तम्भस्थापनविधिः ।

**प्र-१२ त्रयाणां प्रश्नानाम् उत्तरं लिखत ।** **०३**

१. वैश्यरूपः स्तम्भः कस्यां दिशि स्थापनीयः?

२. नाट्यगृहस्य भित्तिषु कदा चित्रकर्म कार्यम्?

३. रङ्गपीठस्य पार्श्वे किं कर्तव्यम्?

४. नाट्यशास्त्रस्य द्वितीयाध्यायस्य विषयवस्तु किम्?